श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script. **Download** the font from here

---

## कामासिकाष्टकम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि॥

श्रुतीनाम् उत्तरं भागं वेगवत्याश्च दक्षिणम्
कामाद् अधिवसन् जीयात् कश्चिद् अद्भुत केसरी॥१

तपनेन्द्वग्नि नयनः तापान् अपचिनोतु नः।
तापनीय रहस्यानां सारः कामासिका हरिः॥२

आकण्ठं आदिपुरुषं
कण्ठीरवम् उपरि कुण्ठि तारातीम्।
वेगोपकण्ठ सङ्गात्
विमुक्त वैकुण्ठ बहुमतिम् उपासे॥३

बन्धुम् अखिलस्य जन्तोः
बन्धुर पर्यङ्क बन्ध रमणीयम्।
विषम विलोचन मीडे
वेगवती पुलिन केलि नरसिंहम्॥४

स्व स्थानेषु मरुद्गणान् नियमयन् स्वाधीन सर्वेन्द्रियः

पर्यङ्क स्थिर धारणा प्रकटित प्रत्यङ्मुखा वस्थितिः ।
प्रायेण प्रणिपेदुषः प्रभुरसौ योगं निजं शिक्षयन् ।
कामान् आतनुताद् अशेष जगतां कामासिका केसरी ॥५

विकस्वर नख स्वरु क्षत हिरण्य वक्षः स्थली
निरर्गल विनिर्गलद् रुधिर सिन्धु सन्ध्यायिताः ।
अवन्तु मदनासिका मनुज पञ्च वक्रस्य माम्
अहम् प्रथमिका मिथः प्रकटिताहवा बाहवः ॥६

सटा पटल भीषणे सरभ साट्टा हासोद्भटे
स्फुरत् कृधि परिस्फुटद् भृकुटिकेऽपि वक्रे कृते ।
कृपा कपट केसरिन् दनुज डिम्भ दत्त स्तना
सरोज सदृशा दृशा व्यतिविषज्य ते व्यज्यते ॥७

त्वयि रक्षति रक्षकैः किमन्यैः
त्वयि चारक्षति रक्षकैः किमन्यैः ।
इति निश्चित धीः श्रयामि नित्यं
नृहरे वेगवती तटाश्रयं त्वाम् ॥८

इत्थं स्तुतः सकृदि हाष्टभिरेष पद्यैः
श्री वेङ्कटेश रचितैस्त्रिदशेन्द्र वन्ध्यः ।
दुर्दान्त घोर दुरित द्विरदेन्द्र भेदी
कामासिका नरहरिर् वितनोतु कामान् ॥९

कवितार्किक सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

---

Please send your comments and suggestions to R.Venkat